শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

## শ্রী শঙ্করাচার্য ৱিরচিতম্

# ॥শ্রী লক্ষ্মীনৃসিংহপঞ্চরত্নম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রী লক্ষ্মীনৃসিংহপঞ্চরত্নম্॥

ত্বতপ্রভুজীৱপ্রিযমিচ্ছসি চেন্নরহরিপূজাং কুরু সততং
প্রতিবিম্বালংকৃতিধৃতিকুশলো বিম্বালংকৃতিমাতনুতে।
চেতোভৃঙ্গ ভ্রমসি ৱৃথা ভৱমরুভূমৌ ৱিরসাযাং
ভজ ভজ লক্ষ্মীনরসিংহানঘপদসরসিজমকরন্দম্॥ ১॥

শুক্তৌ রজতপ্রতিভা জাতা কটকাদ্যর্থসমর্থা চেত্
দুঃখমযী তে সংসৃতিরেষা নির্ৱৃতিদানে নিপুণা স্যাত্।
চেতোভৃঙ্গ ভ্রমসি ৱৃথা ভৱমরুভূমৌ ৱিরসাযাং
ভজ ভজ লক্ষ্মীনরসিংহানঘপদসরসিজমকরন্দম্॥ ২॥

আকৃতিসাম্যাচ্ছাল্মলিকুসুমে স্থলনলিনত্বভ্রমমকরোঃ
গন্ধরসাৱিহ কিমু ৱিদ্যেতে ৱিফলং ভ্রাম্যসি ভৃশৱিরসেস্মিন্।
চেতোভৃঙ্গ ভ্রমসি ৱৃথা ভৱমরুভূমৌ ৱিরসাযাং
ভজ ভজ লক্ষ্মীনরসিংহানঘপদসরসিজমকরন্দম্॥ ৩॥

স্রকচন্দনৱনিতাদীন্বিষযান্সুখদান্মত্বা তত্র ৱিহরসে
গন্ধফলীসদৃশা ননু তেমী ভোগানন্তরদুঃখকৃতঃ স্যুঃ।
চেতোভৃঙ্গ ভ্রমসি ৱৃথা ভৱমরুভূমৌ ৱিরসাযাং
ভজ ভজ লক্ষ্মীনরসিংহানঘপদসরসিজমকরন্দম্॥ ৪॥

তৱ হিতমেকং ৱচনং ৱক্ষ্যে শৃণু সুখকামো যদি সততং
স্বপ্নে দৃষ্টং সকলং হি মৃষা জাগ্রতি চ স্মর তদ্বদিতি।
চেতোভৃঙ্গ ভ্রমসি ৱৃথা ভৱমরুভূমৌ ৱিরসাযাং
ভজ ভজ লক্ষ্মীনরসিংহানঘপদসরসিজমকরন্দম্॥ ৫॥

॥ইতি শ্রী লক্ষ্মীনৃসিংহপঞ্চরত্নম্ সমাপ্তম্॥

www.prapatti.com